रोल नं. | | | | | | | | |

मुद्रित पृष्ठों की संख्या : 8

105

405 (IXW)

# 2024

# संस्कृतम्

समय : 3 घण्टे ]

[ पूर्णांक : 80

## खण्ड – 'क' (अपठितांश-अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–
(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिये)

अहिंसा शान्तेः मूलम् । अहिंसायाः व्यवहारः सर्वत्र सौहार्दं जनयति, सौख्यम् उत्पादयति, औदार्यं विस्तारयति, दयाभावं विभावयति, शान्तिं च विस्तारयति। अहिंसया जनः हिंस्र पशूनपि वशीकरोति किमुत मानवान् । यस्य चित्ते अहिंसायाः प्रतिष्ठा सम्यक् भवति तत्समीपमागत्य सर्वे प्राणिनः वैरभावं त्यजन्ति। क्रूरतायाः हिंसायाश्च मूर्तरूपो दस्युराजः अंगुलिमालः भगवतः बुद्धस्य सामीप्यं प्राप्य हिंसां सर्वथा तत्याज भिक्षुकत्वं च जग्राह। एवमेव भगवतः महावीरस्य, महर्षि दयानन्दस्य, महात्मा गांधिमहाभागस्य च जीवनानि अहिंसाया उदाहरणानि। प्राचीनयुगे अहिंसाव्रतदीक्षितानाम् ऋषीणामाश्रमेषु गुरूकुलेषु च परस्परविरोधिनोऽपि गोव्याघ्रादिपशवः वैरभावं परित्यज्य प्रेमपूर्वकं निवसन्ति स्म। अहिंसायाः एष एव प्रभावः आसीत् ।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4=2

(i) शान्तेः मूलं किम् ?

(ii) अहिंसा किं विस्तारयति?

(iii) के वैरभावं परित्यज्य प्रेमपूर्वकं निवसन्ति स्म?

(iv) बुद्धस्य सामीप्यं प्राप्य कः हिंसां तत्याज?

(ख) संस्कृतस्य पूर्ण वाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) – 1×2=2

(i) अहिंसायाः कीदृशः प्रभावः आसीत्?

(ii) केषां जीवनानि अहिंसायाः उदाहरणानि?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3=3

(i) 'आगत्य' पदे कः प्रत्ययः?

(ii) 'गद्यांशे 'त्यजन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

(iii) 'भगवतः' पदे का विभक्तिः?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश का उचित शीर्षक लिखिये) 1

**खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)**

2. विद्यालये संस्कृत-महोत्सवस्य उद्घाटनाय उपजिलाधिकारी महोदयं प्रति आमन्त्रण-पत्रम् मञ्जूषा पद सहायतया पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत। ½×8=4

(विद्यालय में संस्कृत महोत्सव के उद्घाटन के लिए उपजिलाधिकारी महोदय को आमन्त्रणपत्र मञ्जूषा में दिये गये पदों की सहायता से पूर्ण कर उत्तर पुस्तिका में पुनः लिखिये)

| |
|---|
| **मञ्जूषा** - अनुगृह्णन्तु, अभिवर्धनाय, विद्यालये, प्रार्थये, पञ्चदश, कार्यक्रमे, आयोजनं, निवेद्यते |

सेवायाम्,

उपजिलाधिकारी

रामनगरम् - नैनीतालः

विषयः - संस्कृत महोत्सवस्य उद्घाटनाय आमन्त्रणपत्रम्

महोदय !

सविनयं (i).........यत् अस्माकं (ii).........संस्कृत भाषायाः (iii) ...... प्रचाराय-प्रसाराय च अक्टूबर मासस्य (iv)........तिथौ संस्कृत महोत्सवस्य (v).........भविष्यति। अस्मिन् (vi)......भवान् सादरम् आमन्त्रितः (vii).........यत् उक्त तिथौ एकादशवादने स्व गरिमामयीं उपस्थितिं विधाय माम् (viii) ....।भवतः आगमनं विद्यालय परिवारस्य कृते गौरवकारकः भविष्यति।

भवदीयः

प्रधानाचार्यः

राजकीय माध्यमिक विद्यालयः

रामनगरम्

दिनांक : 20.09.2023

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-
(मञ्जूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को पूर्णकर उत्तरपुस्तिका में पुनः लिखिये) ½×8=4

आंग्लवेषधारी (i)......... सज्जनः रेलयानात् अवतरति उच्चैः (ii).....आह्वयति च। यदा कोऽपि न आगच्छति तदा सः व्याकुलो (iii).........एकस्मिन् स्थाने उपविशति। कतिचित्क्षणानन्तरं एकः युवकः आगत्य तस्य भारं गृहीत्वा तेन सह गन्तुं प्रारभते। (iv).....प्राप्य सः युवकः स्वगृहं प्रत्यागच्छति (v).....अपि न स्वीकरोति। सायंकाले आंग्लवेषधारी सः सज्जनः (vi).......गच्छति। तत्र तं भारवाहकं युवकं (vii).......आश्चर्यचकितः (viii)......। सः कुशलवक्ता ईश्वरचन्द्र विद्यासागरः आसीत्।

**मञ्जूषा** – भारवहनमूल्यं, कश्चिद्, अभीष्टस्थानं, सञ्जातः, सभायां, भूत्वा, दृष्ट्वा, भारवाहकम्

4. अधोलिखितेषु **एकं** विषयम् अधिकृत्य चत्वारिवाक्यमितम् एकम् अनुच्छेदं संस्कृते लिखत- 1×4=4
(नीचे लिखे किसी **एक** विषय पर चार वाक्यों का संस्कृत में एक अनुच्छेद लिखिये)–
(i) चन्द्रयानम् (ii) महिला सशक्तिकरणम् (iii) अनुशासनम्

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि-विच्छेदं कुरुत – 1×5=5
(निम्नलिखित वाक्यों में रेखांकित पदों में सन्धि-विच्छेद कीजिए)
(i) यान्यस्माकं सुचरितानि।
(ii) आर्तस्य यथौषधम्।
(iii) अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्।
(iv) भविष्यवाणीं निशम्य मुञ्जो विच्छायवदनोऽभूत्।
(v) शाटीव सा जयति काञ्चन हल्दीघाटी।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहाः लेखनीयाः – 1×5=5
(निम्नलिखित वाक्यों में रेखांकित पदों का विग्रह कीजिये)
(i) युद्धेऽधिकोशमपि शत्रुवधे क्रमेण।
(ii) कुण्डले! लक्ष्मीपूजायां न मे प्रवृत्तिः।
(iii) अथ यदि ते कर्मविचिकित्सा स्यात्।
(iv) यथायोग्य एव पदे नियुक्तोऽसि।
(v) एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।

7. निम्नलिखितेषु वाक्येषु कोष्ठकान्तर्गत प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत - 1×6=6
(निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिये)
(i) यस्याः शक्रसमो भर्ता मया-----------च या। (पुत्र + वतुप् (स्त्री.))
(ii) --------- हि दण्डस्य मुहूर्तमात्रम्। (भिद् + तुमुन्)
(iii) त्वया भोजो भुवनेश्वरी विपिने रात्रौ ----------। (हन् + तव्यत्)
(iv) आचार्येति पदं --------शिष्येभ्यःजीवनकलांशिक्षयिष्यामि। (प्र + आप् + ल्यप्)
(v) एवं चैतद् -----------। (उप + आस् + यत्)
(vi) राणाप्रताप बलवीर्य ---------। (वि + भास् + शानच्)

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम् – 1×4=4

(निम्नलिखित वाक्यों में कर्ता और क्रिया पदों की अन्विति कीजिये)

(i) अल्पज्ञ एव--------प्रलपति। (पुरूषः/पुरूषाः/पुरूषौ)

(ii) गृहस्थाश्रमोऽपि एका प्रयोगशाला -------। (सन्ति/स्तः/अस्ति)

(iii) त्वादृक्षाः एव वस्तुतः पुरस्कारभाजनानि---------। (भवति/भवतः/भवन्ति)

(iv) भोजश्चापि चिरं प्रजाः -------------------। (पालितवन्तः/पालितवान् /पालितवन्तौ)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषण-विशेष्ययोः अन्वितिः क्रियताम् –

(निम्नलिखित वाक्यों में विशेषण और विशेष्य पदों की अन्विति कीजिये)

(i) ----------मुञ्जः प्रायश्चित्तं कर्तुं। (शोकसंतप्तः/शोकसंतप्तौ/शोक संतप्ताः)

(ii) वक्तारमपश्यतैव आकर्ण्य मन्द्रमेदुरा-------। (वाणी/वचनं/ वाण्या)

(iii) हल्दीघाटी काञ्चनकाञ्चनीयां---------दधाति। (शोभायाम्/शोभां/शोभा)

(iv) यानि अनवद्यानि---------। (कर्म/कर्मणी/कर्माणि)

9. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्- 1×4=4

(निम्नलिखित वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थानों की पूर्ति कीजिए)

(i) वसुमती----------अपि समं न गता। (एक)

(ii) --------- हस्तेनैव विसर्जितः। (राजन् )

(iii) भवन्ति सम्पदं दैवीम् ---------भारत। (अभिजात)

(iv) --------पृष्ठेहस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत् । (तद्)

## खण्ड - 'घ' (पठितांश अवबोधनम् भाग-I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत –

(निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिये)

ततो राजा ब्राह्मणं संप्रेष्य निशीथे शयनमासाद्य व्यचिन्तयत् - यदि राजलक्ष्मीर्भोजकुमारं गमिष्यति, तदा जीवन्नपि मृतः। ततश्च अभुक्त एव सः एकाकी किमपि चिन्तयित्वा बंगदेशाधीश्वरं वत्सराजं समाकारितवान् । वत्सराजश्च धारानगरीं सम्प्राप्य राजानं प्रणिपत्योपविष्टः। राजा च सौधं निर्जनं विधाय वत्सराजं प्राह-त्वया भोजो भुवनेश्वरी-विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2=1

(i) कः बंगदेशाधीश्वरं वत्सराजं समाकारितवान् ?

(ii) भोजो कुत्र हन्तव्यः?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) - 1

(i) राजा निशीथे किं व्यचिन्तयत् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये)- 1×3=3

(i) 'समकारितवान्' अस्य क्रियापदस्य कर्तृपदं किम?

(ii) 'वने' अस्य पदस्य समानार्थी पदं गद्यांशात् चित्वा लिखत?

(iii) 'तस्य शिरः' अत्र 'तस्य' सर्वनाम पदं कस्मै प्रयुक्तम् ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत –
(निम्नलिखित नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए)-

सीता – आर्यपुत्र! रोदितव्ये काले सौमित्रिणा धनुर्गृहीतम । अपूर्वः खल्वस्यायासः!

रामः – सुमित्रामातः! किमिदम् ?

लक्ष्मणः – कथं कथं किमिदं नाम!
क्रमप्राप्ते हृते राज्ये भुवि शोच्यासने नृपे।
इदानीमपि सन्देहः किं क्षमा निर्मनस्विता ।।

रामः – सुमित्रामातः। अस्मद् राज्य भ्रंशो भवत उद्योगं जनयति। आः अपण्डितः खलु भवान् ।
भरतो वा भवेद् राजा वयं वा ननु तत् समम्।
यदि तेऽस्ति धनुः श्लाघा स राजा परिपाल्यताम् ।।

लक्ष्मणः – न शक्नोमि रोषं धारयितुम् ! भवतु भवतु। गच्छामस्तावत् (प्रस्थितः)

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिये) – ½×2=1

(i) रोदितव्ये काले केन धनुर्गृहीतम् ?

(ii) के धनुः श्लाघा अस्ति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) कस्य राज्यभ्रंशो भवत उद्योगं जनयति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'भवतः' पदे का विभक्तिः?

(ii) 'धारयितुम्' पदे कः प्रत्ययः?

(iii) सुमित्रामातः पदे समास विग्रहं कुरुत?

12. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत –

(निम्नलिखित श्लोक को पढ़कर प्रश्नों के उत्तर दीजिये)-

प्राची यदा हसति हे प्रिय! मन्दमन्दं
वायुर्यदा वहति नन्दनजं मरन्दम् ।
या प्रत्यहं किल तदा मतिमाननीयां
शोभां दधात्युषसि काञ्चनकाञ्चनीयाम् ।।

(क) एक पदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2=1

(i) मन्दमन्दं का हसति?

(ii) हल्दीघाटी कीदृशीं शोभां दधाति?

(ख) पूर्ण वाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिये) – 1

(i) वायुः कथं वहति?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिये) – 1×3=3

(i) 'मन्दमन्दम्' पदं कस्य विशेषणम् अस्ति?

(ii) प्रत्यहं पदे समास-नाम लिखत?

(iii) 'या' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

13. निर्देशानुसारं प्रश्नान् उत्तरत –

(निर्देशानुसार प्रश्नों के उत्तर दीजिए)-

(क) अहं न कस्यापि संकेतैः नर्तितुं पारयामि। ½+½=1

(i) एषा पंक्तिः कः कम् प्रति कथयति?

(ख) त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः। ½+½=1

(i) एषा पंक्तिः कस्मात् ग्रन्थात् संकलिता?

(ii) अस्य ग्रन्थस्य रचनाकारः कः?

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत- 1+1=2

(नीचे दिये खण्डों में, तीन भावार्थों में से शुद्ध भावार्थ का चयन कर लिखिये)-

(क) "यस्याः शक्रसमो भर्ता मया पुत्रवती च या।"

**भावार्थ -**

(i) यस्याः इन्द्रसमो पतिः रामेण च पुत्रवती।

(ii) यस्याः वरुण समो पतिः भरतेन च पुत्रवती।

(iii) यस्याः रुद्र समो पतिः लक्ष्मणेन च पुत्रवती।

(ख) "आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी"

**भावार्थ -**

(i) सुपुत्रेण कुलं तथा शोभते यथा नक्षत्रैः शशी।

(ii) सुपुत्रेण कुलं तथा शोभते यथा सूर्येण दिवसः।

(iii) सुपुत्रेण कुलं तथा शोभते यथा शशिना रात्रिः।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्त भावार्थं मञ्जूषा प्रदत्तपदैः पूरयित्वा लिखत – ½×4=2

(नीचे दिये गये श्लोक के भावार्थ को मञ्जूषा में दिये गये पदों से पूर्ण करके लिखिये)

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव।।

**भावार्थः** – श्रीकृष्णः कथयति यत् (i) .........दैवी सम्पदा (ii) ............भवति। आसुरी सम्पदा (iii) .........भवति। त्वं शोकं मा कुरु यतः (iv) ......... दैवी सम्पदा अर्जिता।

| **मञ्जूषा** - बन्धनाय, भो अर्जुन!, त्वया, मुक्तये |
|---|

15. अधोलिखित श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत –
(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिये)

(क) अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्।
भोजने चामृतं वारि भोजनान्ते विषापहम्।। ½×4=2

**अन्वयः** -अजीर्णे (i) ..........भेषजम्, जीर्णे वारि (ii) ...........। (iii)..........च वारि अमृतम्। भोजनान्ते वारि (iv) ................।

(ख) ताते धनुर्न मयि सत्यमवेक्ष्यमाणे
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम्।
दोषेषु वाह्यमनुजं भरतं हनानि
किं रोषणाय रुचिरं त्रिषु पातकेषु ।। ½×4=2

**अन्वयः** - मयि सत्यम् (i) ...........ताते धनुः हि स्वधनं (ii) ............मातरि शरं मुञ्चानि। दोषेषु (iii)...........अनुजं भरतं हनानि। त्रिषु (iv)............रोषणाय किं रुचिरम्?

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचित मेलनं कुरुत– ½×4=2
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिए गये वाक्यांशों के साथ उचित मिलान कीजिये)

| | स्तम्भ 'अ' | | स्तम्भ 'ब' |
|---|---|---|---|
| (क) | अभयं सत्वसंशुद्धिः | (i) | राज्ये मे न मनोरथः |
| (ख) | यत्कृते महति क्लेशे | (ii) | शठः सहस्रैरपि शिक्ष्यमाणः। |
| (ग) | न दुर्जनः सज्जनतामुपैति | (iii) | चेतक चङ्क्रमाणाम् |
| (घ) | सैषास्थली चकित | (iv) | ज्ञान योग व्यवस्थितिः |

17. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रसङ्गानुसारम् उचितार्थं कोष्ठकात् चित्वा लिखत- 1×3=3

(अधोलिखित वाक्यों में रेखांकित पदों के प्रसंगानुसार उचित अर्थ कोष्ठक से चुनकर लिखिये।)

(क) तेजः क्षमा धृतिः शौचम् (पवित्रतां/मलिनतां/सत्यम)

(ख) नैकेनापि समं गता वसुमती (समानं/सम्मानं/सार्धम्)

(ग) न मातुः परिवादं श्रोतुमिच्छामि (प्रशंसां/निन्दां/संवादः)

**खण्ड - 'घ' (संस्कृत साहित्य-परिचयः भाग-II)**

18. (क) निम्नलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचितशब्दैः रिक्तस्थानपूर्तिः क्रियताम् – 1×4=4

(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्तस्थानों की पूर्ति कीजिए)

(i) प्रतिमानाटकस्य विषयवस्तुः ............... आधारिता अस्ति।

(महाभारते / रामायणे / उपनिषद् ग्रन्थे)

(ii) पुरन्ध्रीपञ्चकम् इति ग्रन्थस्य रचनाकारः ............. अस्ति।

(वेदकुमारी घई / अम्बिकादत्तव्यासः / ईशदत्तशास्त्री)

(iii) ................ कवि बल्लाल सेनस्य रचना अस्ति।

(भोजप्रबन्धः / प्रतापविजयः / गीतगोविन्दः)

(iv) अनुशासनम् इति पाठः ............. संकलितः अस्ति।

(कठोपनिषद्ग्रन्थात् / केनोपनिषद्ग्रन्थात् / तैतरीयोपनिषद्ग्रन्थात्)

(ख) निम्नलिखितेषु वाक्येषु कोष्ठकेभ्यः चित्वा उचितैः शब्दैः रिक्तस्थानपूर्तिः क्रियताम् – 1×4=4

(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्तस्थानों की पूर्ति कीजिए)–

(i) .............. वेदेषु प्राचीनतमः। (यजुर्वेदः / ऋग्वेदः / सामवेदः)

(ii) हितोपदेशः .......... रचना अस्ति। (विष्णुशमर्णः / जयदेवस्य / नारायण पण्डितस्य)

(iii) शिशुपालवधम् एकं .......... अस्ति। (महाकाव्यं / नाटकं / गद्यकाव्यं)

(iv) महाकाव्यस्य नायकः .......... गुणैः पूर्णः भवति। (धीरो / धीरोदात्त / धीर ललित)

*****